गृत्समद (आङ्गिरसः शौनहोत्रः पश्चाद्) भार्गवः शौनकः।अग्निः। गायत्री, ६ अनुष्टुप्

**वाजयन्निव नू रथान्योगाँ अग्नेरुप स्तुहि।यशस्तमस्य मीळ्हुषः॥ २.००८.०१**

यशस्तमस्य- अतिशयेन कीर्तिमतः। मीळ्हुषः- आनन्दकरस्य। अग्नेः- पावकस्य सर्वभूतहितक्रतोः। उप- अन्तिके। रथान्। वाजयन्निव- गमयन्निव। योगान्- समाधीः गमयन्। युज समाधौ। नु- क्षिप्रम्। स्तुहि ॥१॥

**यः सुनीथो ददाशुषेऽजुर्यो जरयन्नरिम्।चारुप्रतीक आहुतः॥ २.००८.०२**

यः। सुनीथः- शोभननेता। ददाशुषे- दात्रे। अजुर्यः- जरारहितः। अरिम्- शत्रुम्। जरयन्। चारुप्रतीकः- कल्याणदीप्तिः। आहुतः- आराधितो भवति ॥२॥

**य उ श्रिया दमेष्वा दोषोषसि प्रशस्यते।यस्य व्रतं न मीयते॥ २.००८.०३**

यः। श्रिया- मङ्गळेन। दमेषु- सदनेषु। आ- आभिमुख्येन। दोषोषसि- दिवारात्रम्। प्रशस्यते- स्तूयते। यस्य। व्रतम्- नियतिर्धर्मो वा। न मीयते- न नश्यति ॥३॥

**आ यः स्व१र्ण भानुना चित्रो विभात्यर्चिषा।अञ्जानो अजरैरभि॥ २.००८.०४**

यः। स्वः- सूर्यः। न- इव। भानुना अर्चिषा- प्रकाशेन। चित्रः- असाधारणः। विभाति- दीप्यते। आ- आभिमुख्येन। अभि- अभितः। अजरैः- अमृतभावनैः। अञ्जानः- व्यक्तो भवति ॥४॥

**अत्रिमनु स्वराज्यमग्निमुक्थानि वावृधुः।विश्वा अधि श्रियो दधे॥ २.००८.०५**

अत्रिम्- हव्यभक्षकम्। स्वराज्यम्- स्वतन्त्रम्। अग्निम्- पावकं सर्वभूतहितक्रतुम्। अनु। उक्थानि- मन्त्राः। वावृधुः- वर्धयन्ति। विश्वाः श्रियः- सर्वाणि मङ्गळानि। दधे- अग्निर्धारयति ॥५॥

Dr. Rangaji
WEBOLIM

**अ॒ग्नेरिन्द्र॑स्य॒ सोम॑स्य दे॒वाना॑मू॒तिभि॑र्व॒यम्।**

**अरि॑ष्यन्तः सचेमह्य॒भि ष्या॑म पृतन्य॒तः॥ २.००८.०६**

अग्नेः- पावकस्य क्रतोः। इन्द्रस्य- ईशनाधिदैवतस्य। सोमस्य- रसाधिदैवतस्य। देवानाम्- अन्येषां वरुणादिदेवानाम्। ऊतिभिः- रक्षाभिः। वयम्। अरिष्यन्तः- अहिंसिताः। सचेमहि- सङ्गच्छेम। पृतन्यतः- अस्माभिर्युद्धकामान्। अभि स्याम- अभिभवेम ॥६॥

Dr. Ranganji

WEBOLIM